# मन्त्र पुष्पम्

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः । स्थि॒रैरङ्गै॑स्तुष्टु॒वाग्ं स॑स्त॒नूभिः॑ । व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ॥ स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः । स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥ ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

योऽपां पुष्पं॒ वेद॑ पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । च॒न्द्रमा॒ वा अ॒पां पुष्प॑म्। पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । य ए॒वं वेद॑ । योऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

अ॒ग्निर्वा अ॒पामा॒यत॑नं । आ॒यत॑नवान् भवति । योऽग्नेरा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒वा अ॒ग्नेरा॒यत॑नं । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । योऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

वा॒युर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यो वा॒योरा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै वा॒योरा॒यत॑नं । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । योऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

अ॒सौ वै तप॑न्न॒पामा॒यत॑नं । आ॒यत॑नवान् भवति । योऽमुष्य॒तप॑त आ॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वा अ॒मुष्य॒तप॑त आ॒यत॑नं ।आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । योऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यश्च॒न्द्रम॑स आ॒यत॑नं वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै च॒न्द्रम॑स आ॒यत॑नं॒ । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । योऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

LYRICSCHALISA.COM
LYRICS CHALISA

नक्ष॑त्राणि॒ वा अ॒पामा॒यत॑नं॒ । आ॒यत॑नवान् भवति । यो नक्ष॑त्राणामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै नक्ष॑त्राणामा॒यत॑नं॒ । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नं । आ॒यत॑नवान् भवति । यः प॒र्जन्य॑स्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै प॒र्जन्य॑स्या॒यत॑नं॒ । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

सं॒व॒त्स॒रो वा अ॒पामा॒यत॑नं॒ । आ॒यत॑नवान् भवति । यः सँ॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै सँ॑वत्स॒रस्या॒यत॑नं॒ । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽप्सु नाव॒ं प्रति॑ष्ठितां॒ वेद॑ । प्रत्ये॒व ति॑ष्ठति ।

ॐ रा॒जा॒धि॒रा॒जाय॑ प्रसह्य सा॒हिने॑ । नमो॑ व॒यं वै॑श्रव॒णाय॑ कुर्महे । स मे॒ कामा॒न् काम॒ कामा॑य॒ मह्य॑म् । का॒मे॒श्व॒रो वै॑श्रव॒णो द॑दातु । कु॒बे॒राय॑ वैश्रव॒णाय॑ । म॒हा॒रा॒जाय॒ नमः॑ ।

ॐ॑ तद्ब्र॒ह्म । ॐ॑ तद्वा॒युः । ॐ॑ तदा॒त्मा ।
ॐ॑ तद्स॒त्यम् । ॐ॑ तत्सर्व॑म् । ॐ॑ तत्पुरो॒र्नमः ॥

अन्तश्चरति॑ भूते॒षु गुहायां वि॑श्वमू॒र्तिषु ।
त्वं यज्ञस्त्वं वषट्कारस्त्व-मिन्द्रस्त्वगं्
रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं॑ प्रजा॒पतिः ।
त्वं त॑दाप॒ आपो॒ ज्योती॒रसो॒ऽमृतं ब्रह्म॒ भूर्भुव॒स्सुव॒रोम् ।

ईशानस्सर्व॑ विद्या॒नामीश्वरस्सर्व॑भूता॒नां
ब्रह्माधि॑पति॒र्-ब्रह्म॒णोऽधि॑पति॒र्-ब्रह्मा॑ शिवो मे॑ अस्तु सदाशि॒वोम् ।

LYRICSCHALISA.COM
LYRICS CHALISA

तद्विष्णोः॑ पर॒मं प॒दग्ं सदा॑ पश्यन्ति

सूरयः॑ । दि॒वीव॒ चक्षु॒रात॑तम् । तद्विप्रा॑सो

विप॒न्यवो॑ जागृ॒वाग्ं सस्समि॑न्धते ।

विष्णो॒र्यत्प॑र॒मं प॒दम् ।

ऋतग्ं स॒त्यं प॑रं ब्र॒ह्म॒ पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम् ।

ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्षं वि॒श्वरू॑पाय॒ वै नमो॒ नमः॑ ॥

ॐ ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासुदे॒वाय॑ धीमहि ।

तन्नो॑ विष्णुः प्रचो॒दया॑त् ॥

ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ।

*********

LYRICSCHALISA.COM

LYRICS CHALISA

Thanks for downloading. Lyrics Chalisa is your no 1 website portal for all devotional mantras, stotram, bhajans, and more with ready-to-download PDF and audio files.

**Note:** We make corrections of stotram , mantras, and bhajans on a daily basis.  So if you find any mistakes let us know or you can also add your corrections via filling the contact form.

Contact Us Here ➤ https://lyricschalisa.com/contact/

Click Here For More ➤ lyricschalisa.com

Stotram Link ➤ Mantra Pushpam